हर हर शंकर ॐ जय जय शंकर

     

श्री-वेदव्यासाय नमः

श्रीमद्-आद्य-शंकर-भगवत्पाद-परंपरागत-मूलाम्नाय-सर्वज्ञ-पीठम्
श्री-कांची-कामकोटि-पीठम्
जगद्गुरु-श्री-शंकराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ तुला-स्नान-विधिः ॥

**The procedure for Tula Snanam**

## The Significance of Tula Snanam

### ☞ The Greatness of Kaveri

’Tula Snanam’ refers to the act of bathing in the river Kaveri during the Tula month (Tamil Aippasi). Performing this ritual bestows immense punya. Throughout this entire month, all sacred waters — including those of the river Ganga — reside within the river Kaveri.

Tula Snanam is performed on the days when Tula month exists during the Arunodaya (four nadika-s before sunrise). Bathing daily in the Kaveri during this month grants a person the four purusharthas: Dharma, Artha, Kama, and Moksha. Furthermore, dana dharma activities performed on the banks of the Kaveri during this month yield punya equivalent to performing the same acts on the banks of the river Ganga.

## The dip of the lame devotee (Mudavan Muzhukku)

There is a special observance associated with Tula Snanam that takes place on the first day after the main Tula snana period (usually the first day of the Vrishchika month). This is known as "Mudavan Muzhukku" or the dip of the lame devotee.

The story goes that a man named Natha Sarma who was lame (unable to walk), and his wife Anavidyambika, having heard of the great significance of Tula Snanam, traveled a long distance to reach Mayuram (Mayiladuthurai). Due to the disability, they arrived only as the month of Tula was coming to an end. Upon realizing that the prescribed period for Tula Snanam had already passed, they were deeply disappointed.

As they prayed to the Lord in their sorrow, Bhagavan Shiva appeared in their dreams and instructed them to bathe the following morning (the first day of the Vrishchika month), assuring them that they would receive the punya of snana during the entire Tula month. Therefore, for those who are unable to bathe throughout the entire month of Tula, taking a ritual bath on the day of 'Mudavan Muzhukku' will yield the same merit.

**आचमनम्। शुक्लांबरधरं + शांतये। प्राणायामः।**
**ममोपात्तसमस्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं**

तदेव लग्नं सुदिनं तदेव ताराबलं चंद्रबलं तदेव।
विद्याबलं दैवबलं तदेव लक्ष्मीपतेः अंघ्रियुगं स्मरामि॥

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा।
यः स्मरेत् पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः॥

मानसं वाचिकं पापं कर्मणा समुपार्जितम्।
श्रीराम-स्मरणेनैव व्यपोहति न संशयः॥

**श्री राम राम राम**

तिथिर्विष्णुः तथा वारः नक्षत्रं विष्णुरेव च।
योगश्च करणं चैव सर्वं विष्णुमयं जगत्॥

श्रीगोविंद गोविंद गोविंद।

ममोपात्त-समस्त-दुरित-क्षय-द्वारा श्रीपरमेश्वर-प्रीत्यर्थं भगवतः नारायणस्य परमेश्वरस्य अचिंत्यया अपरिमितया शक्त्या भ्रियमाणस्य महाजलौघस्य मध्ये परिभ्रमताम् अनेक-कोटि-ब्रह्मांडानाम् एकतमे चतुर्दश-भुवनांतर्गते भू-मंडले सप्त-द्वीप-मध्ये जंबू-द्वीपे नव-वर्ष-मध्ये भारत-वर्षे नव-खंड-मध्ये भरत-खंडे हिमाचल-कैलास-विंध्याचलादि-अनेक-पुण्य-शैल-शिखरिते दंडकारण्य-विंध्यारण्य-वेदारण्यादि-अनेक-पुण्यारण्य-वनश्री-भास्वरे अस्मिन् भारत-देशे प्रवहंतीनां प्रियाः मातर इव पयसा प्रजाः पुष्णतीनां नदीनाम् अन्यतमायां **कावेरी-नाम्न्याम्**

1. कर्णाटकेषु कोडगु-इति-ख्यात-मलयाचल-संज्ञक-सह्याद्रि-प्रदेशे संभूतायां, द्रविडेषु श्वेतारण्य-क्षेत्र-समीपे कावेरी-पत्तनाख्ये पुण्य-स्थले समुद्रं प्राप्नुवत्याम्,

2. साक्षाद् विष्णु-माया-रूपिण्यां, चतुर्मुखस्य कन्यात्वेन स्थितायां, तदनुग्रहात् कवेर-नाम्नो राज्ञः पुत्रीत्वं प्राप्तायां, मनुष्य-रूपेण लोपामुद्रा-नाम्ना अगस्त्य-पत्नीत्वं गतायां, तीर्थ-रूपेण तत्-कमंडलु-स्थितायां,

3. भगवता नारायणेनैव दक्षिण-गंगात्वेन उक्त्वा,

   त्रि-रात्रं जाह्नवी-तीरे पंच-रात्रं तु यामुने।
   सद्यः पुनाति कावेरी पापम् आ-मरणांतिकम्॥

   इति च प्रशस्तायाम्, भगवता महेश्वरेण "अहं तव उत्पत्ति-स्थान-प्रभृति समुद्र-संगम-पर्यंतम् उभयोः कूलयोः वत्स्यामि" इति अनुगृहीतायाम्,

4. तुला-संक्रमण-पुण्य-काले भगवता गणेशेन काक-रूप-धरेण अगस्त्य-कमंडलोः निपातितायां, सह्याद्रि-गत-नारायणांश-आमलक-वृक्ष-मूल-संभूतायां, ब्रह्म-कमंडलु-स्थित-शंख-निनीत-विरजा-तीर्थ-संगतायाम्, सह्यामलक-तीर्थ-शंख-तीर्थ-समाख्या-प्रसिद्धायाम्, वेद-घोष-तुल्य-शब्देन महावेगेन शिला-वृक्षादि-घर्षणेन ऋजु-वक्र-मंडलादि-अनेकाकारेण समुद्राभिमुखं प्रवाहितायां,

5. शिरः-स्थान-स्थित-दत्तात्रेयायाम्, अंक-स्थान-शयित-रंगनाथायां, श्रीवैकुंठ-रूपांतर-श्रीरंग-क्षेत्र-मंडितायां,

6. तुला-मास-पुण्यकाले तुला-पुष्कर-पुण्यकाले च सर्वलोकगत-सार्ध-त्रिकोटि-पुण्य-तीर्थ-संगतायाम्, अर्धोदय-महोदयादि-काले अतिविशिष्ट-स्नानायाम्,

7. तूष्णीं-स्नानेन अपि सप्त-जन्म-पाप-विनाशिन्यां, नियम-पूर्वक-स्नानेन उभय-वंश-सप्त-पुरुष-उद्धारण-कारिण्याम्, अनेक-नरक-यातना-निवृत्ति-हेतु-भूतायां, साक्षात्-स्नान-अशक्तानाम् आनयनेन, शीतल-स्नान-अशक्तानाम् उष्णीकरणेन अपि स्नानेन पुण्य-दायाम्

8. विश्वामित्र-भीष्म-युधिष्ठिर-अर्जुनादि-महापुरुषैः सेवितायां, वेदराशि-नामकस्य तपः-शीलस्य विप्रस्य अत्यंत-पुण्यातिशय-प्रदानेन प्रसिद्धायाम्, अश्वमेध-यागं कर्तुम् उद्युक्ताय हरिश्चंद्र-महाराजाय तद्-योग्यता-सिद्ध्यर्थम् नारदेन अगस्त्येन च उपदिष्ट-स्नानायाम्

9. आयुर्-आरोग्य-प्रदायां, जप-पुरश्चरण-व्रतादि-सिद्धि-प्रदायाम्

10. देवानाम् ऋषीणां पितृणां मनुष्याणां प्राणिनां सर्व-भूत-वर्गाणां परम-तृप्ति-प्रदायाम्

एवमादि-बहु-गुण-विशेषण-विशिष्टायाम् अस्यां कावेरी-महानद्याम्
समस्त-हरि-हर-देवता-गुरुचरण-श्रोत्रिय-सन्निधौ
ब्रह्मणः द्वितीय-परार्धे श्वेतवराह-कल्पे प्रथमे वर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे अह्नि द्वितीये यामे तृतीये मुहूर्ते सप्तमे वैवस्वत-मन्वंतरे अष्टाविंशतितमे कलियुगे प्रथमे पादे अस्मिन् वर्तमाने व्यावहारिकाणां प्रभवादीनां षष्ठ्याः वत्सराणां मध्ये ____-नामनि वत्सरे **दक्षिणायने शरद्**-ऋतौ **तुला**-मासे **शुक्ल/कृष्ण**-पक्षे ____ शुभतिथौ ____-वासरयुक्तायां ____-नक्षत्रयुक्तायाम् ____-योगयुक्तायां ____-करणयुक्तायाम् तुला-मास-पुण्य-काले –

1. अस्माकं सर्वेषां महाजनानां क्षेम-स्थैर्य-वीर्य-विजय-आयुः-आरोग्य-ऐश्वर्याणाम् अभिवृद्ध्यर्थं

2. धर्म-अर्थ-काम-मोक्ष-रूपचतुर्विध-फल-पुरुषार्थसिद्ध्यर्थम्, इष्ट-काम्यार्थ-सिद्ध्यर्थं

3. जनानां धर्मैक-श्रद्धा-प्रवृत्ति-उभय-सिद्ध्यर्थं दुराचार-निवृत्तिपूर्वक-सदाचार-संपत्त्यर्थं

4. तेन अतिवृष्टि-अनावृष्टि-राहित्येन पर्याप्त-वृष्ट्या वापी-कूपादि-जलाशयानां संपूर्त्यर्थम्, उपनदी-सहितासु कावेरी-ताम्रपर्णी-पिनाकिनी-तुंगभद्रा-कृष्णा-गोदावरी-प्रभृतिषु सम्यक्-प्रवाह-सिद्ध्यर्थं

5. जनानां जल-संपदः सम्यग्-विनियोगे श्रद्धायाः उदयार्थं, परिसर-प्रदूषण-परिहारेण पृथिव्याः ताप-शांत्यर्थं

6. तद्द्वारा देशेऽस्मिन् सर्व-धान्यानाम्, औषधादि-गुणयुक्तानां सस्यानाम्, छाया-फलादि-प्रदानां वृक्षाणां च समृद्ध्यर्थं, गवादीनां बहुक्षीरादि-प्रदत्वार्थम्

7. अनेन सर्वेण एतद्-देश-निवासिनां सुख-शांत-जीवन-सिद्ध्यर्थम्

8. मम बाल्यादिषु जागृदादिषु च अवस्थासु मनो-वाक्-काय-कर्मेंद्रिय-ज्ञानेंद्रिय-व्यापारैः काम-क्रोधादिभिः दुष्ट-गुणैश्च संभावितानां ज्ञानतः सकृत् कृतानाम् अज्ञानतः असकृत् कृतानां रहस्यकृतानां प्रकाशकृतानां वा महापातक-समपातक-उपपातकादीनां सर्वेषां पापानां सद्यः अपनोदनार्थं श्रुति-स्मृति-पुराण-प्रतिपादित-कर्मानुष्ठान-अधिकारसिद्ध्यर्थं च

अस्यां ____ शुभतिथौ

दुर्भोजन-दुरालाप-दुष्प्रतिग्रह-संभवम् ।
पापं हर मम क्षिप्रं सह्यकन्ये नमोऽस्तु ते॥

सह्यपादोद्भवे देवि श्रीरंगोत्संगगामिनि।
श्रीकावेरि नमस्तुभ्यं मम पापं व्यपोहय॥

इत्यादिना प्रार्थितायां भगवत्यां कावेर्यां स्नानम् अन्यानि च यथाशक्ति पूजादानादीनि धर्मकार्याणि करिष्ये॥ (अप उपस्पृश्य)

# प्रार्थना

अतिक्रूर महाकाय कल्पांत-दहनोपम।
भैरवाय नमस्तुभ्यम् अनुज्ञां दातुमर्हसि॥

समस्त-जगदाधार शंखचक्र-गदाधर।
देहि देव ममानुज्ञां युष्मत्तीर्थ-निषेवणे॥

Snana should be done silently by uttering only mantras or Bhagavan Nama. Those who do snana in the river, should face against the flow of the river and those who do snana at other places should face the Sun. Chanting Veda mantras in the following procedures are to be done by those who have learnt them. Others may chant the Bhagavan Nama of their choice or other stotras in praise of Bhagavan as mantras. Snana should not be done without mantras!

# सूक्तपठनम्

Varuna Sukta is to be chanted. Those who do not know may chant at least the Purusha Sukta. This is a prayer to Varuna before bathing.

# मार्जनम्

आपो हि ष्ठा मयोभुवः …

Saying the above mantras, one should do prokshanam just as in Sandhya-vandanam.

# अघमर्षणम्

हिरण्यशृंगं वरुणं प्रपद्ये …

The sukta starting as above may be chanted by those who know it. Those who do not know may recite Purusha Sukta here as well. Here one should take at least 12 dips and bathe.

# स्नानांग-तर्पणम्

ममोपात्त+प्रीत्यर्थम् अद्य पूर्वोक्त-विशेषण-विशिष्टायाम् अस्याम् __ शुभतिथौ स्नानांग-देव-ऋषि-पितृतर्पणम् अर्घ्यदानं च करिष्ये॥

After doing this Sankalpa, one should do the tarpana as in Brahmayajna.

# कावेरी-देव्यै अर्घ्यप्रदानम्

मरुद्वृधे महाभागे सर्वलोकैकपावनि।
गृहाणार्घ्यं मया दत्तं पावनं कुरु मां सदा॥ १॥
कावेर्यै नमः - इदमर्घ्यम् (३)॥

विष्णुमाये महाकाये कवेरकुलसंभवे।
सह्याचलसमुद्भूते गृहाणार्घ्यं वरप्रदे॥ २॥
कावेर्यै नमः - इदमर्घ्यम् (३)॥

कुंभसंभवकुंभात् त्वं सह्यामलकपूजया।
शंखोदकेन संजाता गृहाणार्घ्यं समुद्रगे॥ ३॥
कावेर्यै नमः - इदमर्घ्यम् (३)॥

# प्रार्थना

मरुद्वृधे महालक्ष्मीस्सह्यकन्या सरस्वती।
अगस्त्यपत्नी कावेरी लोपामुद्रा वरप्रदा॥ १॥

कमंडलुसमुत्पन्ना सर्वतीर्थाधिदेवता।
विरजा दक्षिणा गंगा ब्रह्मविष्णुशिवात्मिका॥ २॥

चतुर्विधफलोद्धात्री चतुराननकन्यका।
सर्वाभीष्टप्रदात्री च नाम्नां षोडशकं स्मृतम्।
एभिर्नामपदैर्नित्यं पूजयेद्भक्तिमान्नरः॥ ३॥

# दानम्

Then, according to one's capacity, saying the following mantras, offer dakshina to Brahmanas.

हिरण्यगर्भ-गर्भस्थं हेमबीजं विभावसोः।
अनंतपुण्यफलदम् अतः शांतिं प्रयच्छ मे॥

अनुष्ठित-तुलास्नान-साद्गुण्यार्थं यथोक्त-फलप्राप्त्यर्थम् इमां दक्षिणां ब्राह्मणाय संप्रददे। न मम।

# यक्ष्म-तर्पणम्

To nullify the sins caused because we mix the dirt such as sweat from our body into the punya tirthas, recite the following shloka, take water with both hands once and do tarpana to Yakshma devata.

यन्मया दूषितं तोयं शारीरमलसंचयात्।
तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहम्॥
यक्ष्माणं तर्पयामि॥

# समर्पणम्

कायेन वाचा मनसेंद्रियैर्वा
बुध्यात्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥

अनेन मया कृतेन तुलास्नानेन परमात्मा सुप्रीतः सुप्रसन्नो वरदो भवतु॥

❀❀❀

## The Greatness of Kaveri

- Originating in the Kodagu region of the Sahya mountain range (the Western Ghats) in Karnataka, the Kaveri eventually reaches the sea near Poompuhar (Kaveripoompattinam), close to Thiruvenkadu in Tamil Nadu.

- She is a manifestation of the Maya (divine illusion) of Lord Vishnu Himself. She was a daughter of Brahma. Through His grace she was born as the daughter of a king named Kavera. Taking on a human form, she became known as Lopamudra and married the sage Agastya. She also resided in the form of sacred water within the sage's kamandalu.

- Shriman Narayana Himself declared her to be "the Ganga of the South", stating that bathing on the banks of the Kaveri for just one day — compared to three days on the banks of the Ganga or five days on the banks of the Yamuna — is sufficient to cleanse one of all sins accumulated throughout one's life. Lord Parameshwara also blessed her, promising to reside in various sacred sites along both her banks, from her source all the way to the sea.

- At the beginning of the Tamil month of Aippasi, when the Sun enters the Tula Rashi, Lord Ganesha — taking the form of a crow — tipped over the kamandalu of Sage Agastya, allowing the Kaveri to flow forth. She began her course in the Sahya mountains beneath an amla (Indian gooseberry/nelli) tree, which is considered an aspect of Shriman Narayana. At that moment, Brahma poured the Viraja Tirtha — held within his own kamandalu — into her waters using a shankha. Consequently, she came to be known as Sahya Amalaka Tirtha and Shankha Tirtha. With a roar resembling the chanting of the Vedas, and moving with great velocity — sweeping along stones and trees, flowing in straight lines, curves, and circular patterns — she journeyed toward the ocean in a myriad of ways.

- At her source stands the great sage Dattatreya, and Lord Ranganatha resting upon Her lap. Shrirangam — a manifestation of Shri Vaikuntha — in situated on her.

- During the Tula Masa Punya Kala each year when Surya enters the

Tula Rashi, and during the 'Tula Pushkaram' that occurs once every twelve years when Brihaspati enters the Tula Rashi, 3.5 crore sacred waters from across the world converge and unite with her. Bathing in her waters during auspicious times such as Ardhodaya and Mahodaya is considered especially meritorious.

- A simple bath in her waters is sufficient to wash away the sins of seven lifetimes. If one bathes according to the prescribed scriptural injunctions, one can liberate seven generations of ancestors from both the maternal and paternal lineages. She has the power to alleviate the torments of various hells. Even for those unable to come and bathe in her directly, even if bath is done by bringing her water to them — or warming it, if the water is too cold — bestows great spiritual merit.

- She has been revered by great souls such as Vishvamitra, Bhishma, Yudhishthira, and Arjuna. The Puranas recount that she granted a supreme state of liberation to an ascetic named Vedarashi. When King Harishchandra sought to perform the Ashvamedha Yaga, the sages Narada and Agastya advised him to bathe in her waters to attain the necessary eligibility for the ritual.

- In the worldly aspect, she bestows longevity and good health. In the spiritual realm, she bestows the siddhi of japa, purashcharana, vrata-s etc.

- She grants profound satisfaction to all beings — including the deva-s (celestial beings), rishi-s (sages), pitru-s (ancestors), humans, and animals.